
# द्रुतवाचनम्

## 1. राजगृहम्

[आधुनिक भारत के प्रसिद्ध पर्यटन स्थलों में राजगृह का स्थान अनेक कारणों से महत्त्वपूर्ण है । यहाँ का प्राकृतिक परिवेश युगों से यात्रियों को आकृष्ट करता रहा है । अनेक तप्त कुण्डों की स्थिति के कारण जाड़े के मौसम में यहाँ एक प्रकार का मेला लग जाता है । मलमास के समय लगनेवाला मेला तो पूरे बिहार में विख्यात है । धार्मिक दृष्टि से वैदिक, बौद्ध तथा जैन धर्मों के पवित्र स्थान के रूप में यह हजारों वर्षों से विख्यात रहा है । भारतीय इतिहास में मगध जनपद का प्रायः एक सहस्र वर्षों तक सम्पूर्ण उत्तरापथ पर शासन रहा था । इसका अवसर इसी नगरी से आरम्भ हुआ । वायुपुराण में मगध के चार प्रसिद्ध पुण्यस्थलों में यह एक है -

मगधेषु गया पुण्या नदी पुण्या पुनःपुना ।
च्यवनस्याश्रमः पुण्यः पुण्यं राजगृहं वनम् ॥]



अहो मनोरमं राजगृहं नाम आरोग्यस्थलं बिहारराज्ये । मगधप्रदेशस्य प्राचीना राजधानी राजगृहमेव बभूव । महाभारते जरासन्धस्य राज्ञः अत्र राजधानी आसीदिति कथा प्राप्यते । जरासन्धस्य भयात् कृष्णः मथुरां परित्यज्य द्वारिकां पलायितः इत्यपि कृष्णकथा श्रूयते । तदानीं राजगृहस्य नाम गिरिव्रजः इति आसीत् । इतिहासे ईसापूर्व षष्ठशतके अत्र

बिम्बिसार: मगधनरेशः प्रथमो राजा आसीत् । तस्य पुत्रः अजातशत्रुः बुद्धकाले कठोरशासकरूपेण प्रसिद्धः । मगधस्य प्रभावं स भारते वर्षे प्रसारितवान् आसीत् । कालान्तरे पाटलिपुत्रे मगधराजधानी प्रतिष्ठापिता । यत् प्राचीरं राजगृहे अद्य प्राप्यते तत् अजातशत्रुकृतस्य दुर्गस्य एव मन्यते ।

राजगृहस्य धार्मिकं महत्त्वं तस्मादेव कालात् वर्धितम् । भगवान् बुद्धः महावीरश्च राजगृहे स्व-स्व प्रवासं कृतवन्तौ । राजगृहे सिद्धार्थः दार्शनिकज्ञानाय समागतः आसीत् । कथ्यते यत् स आचार्यस्य अराडकलामस्य शिष्यरूपेण सांख्यदर्शनस्य ज्ञानं लब्धवान् । ततः पश्चादेव सिद्धार्थः बोधगयां गतः, बोधिं च प्राप्तवान् । पुनः बुद्धरूपेण इह राजगृहे स अनेकान् वर्षावासान् व्यतीतवान् । बुद्धस्य महानिर्वाणात् अनन्तरं सप्तपर्णीगुहायां तस्य वचनानि संगृहीतानि । तत्र प्रथमा बौद्धसंगीतिः आयोजिता ।

जैनानामपि तीर्थस्थलं राजगृहं वर्तते । विपुलपर्वते अद्य प्रसिद्धं जैन मन्दिरं विद्यते । भगवान् महावीरः जैनतीर्थंकरः राजगृहे भूयोभूयः समागतः आसीत् । अतएव जैनाः राजगृहस्य यात्रां पवित्रां मन्यन्ते । अद्य अतिप्रसिद्धं जैनसंस्थानं राजगृहे पुष्पितं फलितं वर्तते । वैदिकधर्मस्य कृतेऽपि राजगृहे त्रैवार्षिकी मलमासमेला आयोजिता भवति । तत्र अपूर्वं दृश्यं जायते ।

राजगृहस्य प्राकृतिकः परिवेशः सौन्दर्यपूर्णः वर्तते । तत्र विशालः परिसरः सप्तभिः हरितैः पर्वतैः अलंकृतः । सर्वे पर्वताः पूजनीयाः । केन्द्रस्थाने तप्तकुण्डानि सर्वदा उष्णं जलं धारयन्ति । ब्रह्मकुण्डे तीर्थयात्रिणः स्नात्वा आरोग्यं लभन्ते । एवमेव सप्तनलिकाभिः प्रवहत् उष्णं जलं च आरोग्यप्रदम् । जापानदेशीयेन बौद्धविदुषा फूजी गुरुणा निर्मितं विश्वशान्तिस्तूपं (निर्माणकाल: 1969 ई०) राजगृहस्य प्रतिष्ठां वर्धयति । तत् स्तूपं प्राप्तुं

रज्जुमार्गोऽपि वर्तते । वेणुवनस्य समीपे जापानीयं बौद्धमन्दिरमपि विद्यते ।

बिम्बिसारस्य कारागारम्, स्वर्णभाण्डागारम्, मखदूमकुण्डम् - इत्यादीन्यपि राजगृहे दर्शनीयानि सन्ति । राजगृहे यात्रिणां निवासाय धर्मशाला: अन्यानि भवनानि च प्रभूतानि सन्ति । पर्यटनविभागेन राजगृहस्य कृते महान् उद्यम: क्रियते ।

**शब्दार्था: -**

| | | |
|---|---|---|
| मनोरमम् | = | सुन्दर |
| प्राप्यते | = | प्राप्त होती है |
| अद्यापि | = | आज भी |
| केचित् | = | कुछ |
| परित्यज्य | = | छोड़कर |
| पलायित: | = | भाग गये |
| श्रूयते | = | सुनी जाती है |
| तदानीम् | = | उस समय |
| प्रसारितवान् | = | फैलाया |
| कालान्तरे | = | बाद में, दूसरे काल में |
| प्रतिष्ठापिता | = | स्थापित की गयी |
| प्राचीरम् | = | किले की |
| तस्मादेव | = | उस समय से ही |

| | | |
|---|---|---|
| वर्धितम् | = | बढ़ा |
| प्रवासम् | = | अस्थायी निवास |
| समागतः | = | आया |
| लब्धवान् | = | पाया |
| बोधिम् | = | ज्ञान, सच्चा ज्ञान |
| इह | = | यहाँ |
| वर्षावासान् | = | वर्षा ऋतु में निवास करना (चातुर्मास) |
| व्यतीतवान् | = | बिताया |
| महानिर्वाणात् | = | मृत्यु के (बाद) |
| अनन्तरम् | = | बाद |
| संगृहीतानि | = | संकलित हुए |
| बौद्धसंगीतिः | = | बौद्धसम्मेलन |
| विपुलपर्वते | = | विपुल नामक पहाड़ पर |
| भूयोभूयः | = | बार-बार |
| समागतः | = | आया |
| कृतेऽपि | = | के लिए भी |
| उष्णम् | = | गर्म |

स्नात्वा = नहा कर

प्राप्तुम् = पहुँचने के लिए

कारागारम् = जेल

स्वर्णभाण्डागारम् = सोन भण्डार (सोना आदि रखने का खजाना)

परिसरः = आँगन, क्षेत्र

रज्जुमार्गोऽपि = रोपवे भी, लोहे की रस्सी से लटकी हुई ट्राली का रास्ता

## व्याकरणम्

### सन्धि-विच्छेदः/पदविच्छेदः –

राजगृहमेव = राजगृहम् + एव

आसीदिति = आसीत् + इति (व्यञ्जनसन्धिः)

अद्यापि = अद्य + अपि (दीर्घसन्धिः)

इत्यपि = इति + अपि (यण्सन्धिः)

तस्मादेव = तस्मात् + एव (व्यञ्जनसन्धिः)

समागतः = सम् + आगतः (व्यञ्जनसन्धिः)

वर्षावासः = वर्षा + आवासः (दीर्घसन्धिः)

कृतेऽपि = कृते + अपि (पूर्वरूपसन्धिः)

पश्चादेव = पश्चात् + एव (व्यञ्जनसन्धिः)

भूयोभूयः = भूयः + भूयः (विसर्गसन्धिः)

रज्जुमार्गोऽपि = रज्जुमार्गः + अपि (विसर्गसन्धिः)

इत्यादीन्यपि = इति + आदीनि + अपि (यणसन्धिः)

**प्रकृति-प्रत्यय-विभागः -**

परित्यज्य = परि + √त्यज् + ल्यप्

समागतः = सम + आ + √गम् + क्त

स्नात्वा = √स्ना + क्त्वा

बभूव = √भू + लिट्लकारः, प्रथमपुरुषः, एकवचनम्

लभन्ते = √लभ् + लट्लकारः, प्रथमपुरुषः, बहुवचनम्

क्रियते = √कृ कर्मवाच्यम्, लट्लकारः, प्रथमपुरुषः, एकवचनम्

आसीत् = √अस् + लङ्लकारः, प्रथमपुरुषः, एकवचनम्

मन्यते = √मन् + लट्लकारः, प्रथमपुरुषः, एकवचनम्

## अभ्यासः

### मौखिकः

1. **निम्नलिखितानां प्रश्नानाम् उत्तरं वदत -**

(क) राजगृहं कस्मिन् राज्ये अस्ति ?

(ख) अजातशत्रुः कस्य पुत्रः आसीत् ?

(ग) अजातशत्रुः कीदृशः राजा आसीत् ?

(घ) राजगृहे क: दार्शनिकज्ञानाय समागत: आसीत् ?

(ङ) सिद्धार्थ: कस्य शिष्यरूपेण सांख्यदर्शनस्य ज्ञानं लब्धवान् ?

2. अधोलिखितानां पदानाम् अर्थं वदत -

परित्यज्य, पलायित:, बभूव, केचित्, प्रसारितवान्, आसीत्, प्रवासम्, प्राचीरम्

3. सन्धिविच्छेदं पदविच्छेदं वा कुरुत -

इत्यादीन्यपि, कृतेऽपि, समागत:, अद्यापि, इत्यपि

## लिखित:

1. अधोलिखितानां प्रश्नानाम् उत्तरम् एकपदेन/द्विपदेन वा लिखत -

(क) मगधप्रदेशस्य प्राचीना राजधानी का बभूव ?

(ख) कस्य भयात् कृष्ण: मथुरां परित्यज्य द्वारिकां पलायित: ?

(ग) ''गिरिव्रज:'' इति कस्य नाम आसीत् ?

(घ) सिद्धार्थ: दार्शनिकज्ञानाय कुत्र समागत: आसीत् ?

(ङ) सिद्धार्थ: कुत्र बोधिं प्राप्तवान् ?

(च) प्रथमा बौद्धसंगीति: कुत्र आयोजिता ?

2. सन्धि-विच्छेदं पदच्छेदं वा कुरुत -

(क) इत्यादीन्यपि = ..............................

(ख) पश्चादेव = ..............................

(ग) कृतेऽपि = ..............................

(घ) रज्जुमार्गोऽपि = ..............................

(ङ) भूयोभूयः = ..............................

(च) आसीदिति = ..............................

3. अधोलिखितेषु क्रियापदेषु लकारं पुरुषं वचनं च लिखत ।

बभूव, मन्यते, आसीत्, लभन्ते, क्रियते ।

4. वाक्यनिर्माणं कुरुत -

आसीत्, विद्यते, महान्, सन्ति, जलम्, पर्वतः

5. अधोलिखितेषु रेखांकितपदेषु विभक्तिं लिखत -

(क) पर्यटनविभागेन महान् उद्यमः क्रियते ।

(ख) राजगृहस्य प्राकृतिक परिवेशः सौन्दर्यपूर्णः वर्तते ।

(ग) वेणुवनस्य समीपे जापानीयं बौद्धमन्दिरमपि विद्यते ।

(घ) तत्र विशालः परिसरः सप्तभिः हरितैः पर्वतः अलंकृतः ।

(ङ) मगधस्य प्रभावं भारतवर्षे प्रसारितवान् आसीत् ।

6. सुमेलनं कुरुत -

| | |
|---|---|
| (क) सिद्धार्थस्य गुरुः | (अ) बोधगयायाम् |
| (ख) सिद्धार्थः बोधिं प्राप्तवान् | (आ) सर्वदा उष्णं जलं धारयन्ति |
| (ग) तप्तकुण्डानि | (इ) कृष्णः पलायितः |
| (घ) जरासन्धस्य भयात् | (ई) अजातशत्रुः |
| (ङ) बिम्बिसारस्य पुत्रः | (उ) अराडकलामः |

* * *